युज, कि संयमे । युतौ । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट् ।) अन्तःस्थाद्यादिः । कि, योजयति योजति । संयमो बन्धनम् । इति दुर्गादासः ॥

युज, ङ क निन्दे । इति कविकल्पद्रुमः ॥ (चुरा०-आत्म०-सक०-सेट् ।) ङ क, योजयते । इति दुर्गादासः ॥

युज, य औ ङ समाधौ । इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-अक०-अनिट् ।) समाधिर्योग्यभावः । य ङ, स्वयमर्थे नियुज्यते । इति हलायुधः । औ, योक्ता । इति दुर्गादासः ॥

युजानः, पुं, सारथिः । इति संक्षिप्तसारोणादिवृत्तिः ॥

युजौ, [ज्] पुं, (युज्+क्विप् ।) अश्विनीकुमारौ । इति त्रिकाण्डशेषः ॥ नित्यद्विवचनान्तोऽयम् ॥

युञ्जानः, पुं, (युज्+शानच् ।) सारथिः । विप्रः । इति मेदिनी । ने, ११३ ॥ भावनासहकारेण सर्व्वज्ञः । यथा,—

"योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः ।
युक्तस्य सर्व्वदा भानं चिन्तासहकृतोऽपरः ॥"

इति भाषापरिच्छेदे । ६५ ॥

"युक्तस्येति । योगाभ्यासावगत्या वशीकृतसमाधिसमासादितो विविधसिद्धयुक्त इत्युच्यते अयमेव विप्रिष्टयोगवत्त्वात् युक्त इत्युच्यते । सर्व्वदेति चिन्तासहकारं विनेत्यर्थः । भानं सर्व्वविषयाणां प्रत्यक्षम् । अपरो युञ्जानः । विषयव्यावृत्ता मानससमाधिस्थः । अयञ्च युञ्जान उच्यते । चिन्ता ध्यानं तदेव कारणं तत्सहकारात् स्थूलसूक्ष्मव्यवहितविप्रकृष्टान् अर्थान् मनः प्रत्यक्षीकरोतीत्यर्थः ।" इति सिद्धान्तमुक्तावली ॥

युत्, स्त्री, निन्दा । यु ङ क निन्दे इत्यस्माद्भावे क्विप्प्रत्ययेन निष्पन्नम् ॥

युत्, [ध्] स्त्री, (योधनमिति । युध्+क्विप् ।) युद्धम् । इत्यमरः ।२।८।१०६ ॥ (त्रि, युद्धकर्त्ता । यथा, भागवते । ६ । १२ । २३ ।
"इति ब्रुवाणावन्योन्यं धर्म्मजिज्ञासया नृप ! ।
युयुधाते महावीर्य्याविन्द्रवृत्रौ युधां पती ॥")

युत, ऋ ङ दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ऋ, अयुयोतत् । ङ, योतते । इति दुर्गादासः ॥

युतं, क्ली, (यु+क्तः ।) हस्तचतुष्टयम् । इति मेदिनी । ते, ४७ ॥

युतः, त्रि, (यु+क्तः ।) युक्तः । अपृथग्भूतः । इति मेदिनी । ते, ४७ ॥ (यथा, भट्टिकाव्ये । १ । ७ ।
"स्त्रीभिर्युतान्यप्सरसामिवौघै-
र्मेरोः शिरांसीव गृहाणि यस्याम् ॥")

युतकं, क्ली, संशयः । युगम् । नारीवस्त्राञ्चलम् । युक्तम् । चलनाग्रम् । यौतुकम् । इति विश्वमेदिन्यौ । के, १४३ ॥ मैत्रीकरणम् । इति शब्दरत्नावली ॥ स्त्रीवस्त्रभेदः । इति हेमचन्द्रः ॥ संश्रयः । शूर्पाग्रम् । इति नानार्थरत्नमाला ॥

युद्, [ध्] स्त्री, (योधनमिति । युध्+क्विप् ।) युद्धम् । इत्यमरः । २ । ८ । १०६ ॥ (यथा, रामायणे । २ । ५१ । १० ।
"यो न देवासुरैः सर्व्वैः शक्यः प्रसहितुं युधि ।
तं पश्य सुखसंसुप्तं तृणेषु सह सीतया ॥")

युद्धं, क्ली, (युध्यते इति । युध्+भावे क्तः ।) योधनम् । लड़ाइ इति भाषा । तत्पर्य्यायः । आयोधनम् २ जन्यम् ३ प्रधनम् ४ प्रविदारणम् ५ मृधम् ६ आस्कन्दनम् ७ संख्यम् ८ समीकम् ९ साम्परायिकम् १० समरम् ११ अनीकम् १२ रणः १३ कलहः १४ विग्रहः १५ संप्रहारः १६ अभिसम्पातः १७ कलिः १८ संस्फोटः १९ संयुगः २० अभ्यामर्द्दः २१ समाघातः २२ संग्रामः २३ अभ्यागमः २४ आहवः २५ समुदायः २६ संयत् २७ समितिः २८ आजिः २९ समित् ३० युत् ३१ । इत्यमरः ।२।८।१०३-१०६॥ संरावः ३२ आनाहः ३३ सम्परायकः ३४ विदारः ३५ दारणम् ३६ संवित् ३७ सम्परायः ३८ । इति शब्दरत्नावली ॥ तीव्रणम् ३९ अम्बरीषम् ४० वलजम् ४१ आनर्त्तः ४२ अभिमरः ४३ समुदयः ४४ । इति जटाधरः ॥ * ॥ युद्धे वर्णनीयानि यथा । चर्म्म १ वर्म्म २ बलम् ३ चरः ४ धूलिः ५ तूर्य्यस्वनः ६ सिंहनादः ७ शवमण्डलम् ८ रक्तनदी ९ छिन्नच्छत्रम् १० रथः ११ चामरः १२ हस्ती १३ अश्वः १४ केतुः १५ विदीर्णकुम्भकहस्तिकुम्भमुक्ता १६ व्यूहरचनावस्थितसेना १७ सुरपुष्पवृष्टिः १८ । इति कविकल्पलता ॥ * ॥ अथ युद्धफलम् ।
"अग्निष्टोमादिभिर्यज्ञैरिष्ट्वा विपुलदक्षिणैः ।
न तत् फलमवाप्नोति संग्रामे यदवाप्नुयात् ॥
इति यज्ञविदः प्राहुर्यज्ञकर्म्मविशारदाः ।
तस्मात्ते प्रवक्ष्यामि यत् फलं शस्त्रजीविनाम् ॥"
युद्धे मरणफलं यथा,—
"धर्म्मलाभोऽर्थलाभश्च यशोलाभस्तथैव च ।
यः शूरो वध्यते युद्धे विमर्दन् परवाहिनीम् ॥
यस्य धर्म्मार्थकामौ च यत्रैव सदृशिवाः ।
परं ह्यभिमुखे हत्वा तयोः पन्थाधिरोहति ॥
विष्णोः स्थानमवाप्नोति एवं युध्यन् रणाजिरे ।
अश्वमेधानवाप्नोति चतुरस्तेन कर्म्मणा ॥
यस्तु शस्त्रं समुत्सृज्य वीर्य्यवान् वाहिनीमुखे ।
सम्मुखो वर्त्तते शूरः स स्वर्गान्न निवर्त्तते ॥
राजा वा राजपुत्त्रो वा सेनापतिरथापि वा ।
हतः क्षत्त्रेण यः शूरस्तस्य लोकोऽक्षयो ध्रुवः ॥
यावन्ति तस्य गात्राणि भिन्दन्ति शस्त्रमाहवे ।
तावतो लभते लोकान् सर्व्वकामदुहोऽक्षयान् ॥
वीरासनं वीरशय्या वीरस्थानस्थितिः स्थिरा ।
गवार्थे ब्राह्मणस्यार्थे गोस्वाम्यर्थे च ये हताः ।
ते गच्छन्त्यमरस्थानं ये स्युः सुकृतिनस्तथा ॥
अभग्नो यः परं सैन्यं भग्नञ्च परिरक्षति ।
पृष्ठस्थितः पालयति सोऽपि गच्छति तद्गतिम् ॥
अनुवर्त्तिंस्तथा सद्यः प्राणान् यस्त्यजते युधि ।
हतश्च स्वपते युद्धे स स्वर्गान्न निवर्त्तते ॥
दंष्ट्रिभिः शृङ्गिभिर्व्वापि तथा म्लेच्छैश्च तस्करैः ।
स्वाम्यर्थे ये हता राजंस्तेषां स्वर्गो न संशयः ॥
शस्त्राग्निना सुनिर्द्दग्धः स्वगृहे च च्युतो यदि ।
संग्रामान्म्रियते राजंस्तस्य स्वर्गो न संशयः ॥
भयेन लज्जया वापि स्नेहेन च रणाजिरे ।
सम्मुखो म्रियते राजंस्तदा स्वर्गो न संशयः ॥
यत्तु भिन्नीकृतं गात्रं शरशक्त्यृष्टितोमरैः ।
देवकन्यास्तु तं वीरं रामयन्ति रमन्ति च ॥
वराप्सरःसहस्राणि शूरमायोधने हतम् ।
त्वरितान्यभिधावन्ति मम भर्त्ता भवेति च ॥
यत्र तत्र हतः शूरः शत्रुभिः परिवेष्टितः ।
अक्षयान् लभते लोकान् यदि क्लीवं न भाषते ॥
जितेन लभ्यते लक्ष्मीर्मृतेनापि सुराङ्गनाः ।
क्षणविध्वंसिनि काये का चिन्ता मरणे रणे ॥
हतस्याभिमुखस्यास्य ये लोका न निवर्त्तिनः ।
हते गोस्वामिविप्रार्थे नरमेधफलं हि तत् ॥
स्थानाभिघाते शरणागते च
राज्ञो विपत्तौ द्विजसार्थघाते ।
स्त्रीबालवृद्धाजनगोग्रहे च
शस्त्रं मुनीनामपि धारणीयम् ॥
यां यज्ञसंघैस्तपसा च विप्राः
स्वर्गैषिणो यत्र न वै प्रयान्ति ।
क्षणेन तामेव गतिं प्रयान्ति
महाहवे स्वां तनुं संत्यजन्तः ॥
सर्व्वांश्च वेदान् सुमहद्भिरङ्गैः
सांख्यञ्च योगञ्च वने विवासम् ।
कृते गुणा एकपदे प्रविष्टा
महाहवे स्वां तनुं संत्यजेद्यः ॥
इमां गिरं वेदविदः शुभाक्षरां
सुभाषितां वृत्रभिदा दिवौकसाम् ।
चमूमुखे यः स्मरते दृढ़स्थिति-
र्न हन्यते हन्ति च सोऽपि वैरिणः ॥
सदा पुण्यतमः स्वर्ग्यः सुयशः सर्व्वतो सुखः ।
सर्व्वेषामेव वर्णानां क्षत्त्रियस्य विशेषतः ॥
भूयश्चैव तु वक्ष्यामि रणधर्म्मं सनातनम् ।
यादृशाय प्रवर्त्तेयं यादृशं परिवर्जयेत् ॥
आततायिनमायान्तमपि वेदान्तगं द्विजम् ।
जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत् ॥
कोदण्डशस्त्रपाणिस्तु प्रहरन्तं द्विजं यदि ।
हन्यात्तमासुरं भावं हत्वा न ब्रह्महा भवेत् ॥
ब्रह्महा जायते येस्तु हतैस्तांस्त्वं प्रशृणुष्व मे ॥
वचःसंखेद नृपश्रेष्ठ ! कायय‍ज्ञे सनानने ।
विरथं विगतं वश्यं विवर्णं विमुखस्थितम् ।
युद्धोत्साहहतं हत्वा ब्रह्महा जायते नरः ॥
विशस्त्रं विधनुष्कञ्च तं भीतोऽस्मीतिवादिनम् ।
वर्णाश्रमायुतांस्तांस्तु हत्वा स ब्रह्महा भवेत् ॥
अन्याहतो न हन्तव्यो बालो वृद्धो नपुंसकः ।
तवाहं प्रवदन्नूचशस्त्रतृणतोऽथ भीरवः ॥
तस्मादेतान् परिहरेत्क्रूरो धर्म्मभृतां वरः ।
सम्यग्यज्ञफलान्वीहन् हत्वासौ ब्रह्महा भवेत् ॥
शक्यन्त्विह सन्देहेस्तु यज्ञैः क्रतुशतैर्नृपाः ।
आत्मदेहपरित्यागः कर्त्तुं युद्धे सुदुष्करः ॥